Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५१३

Title सौभाग्यं कवचम्.
वामकेश्वर तन्त्रे

Author ०

Extent ५ Age ०

Subject तन्त्रम्

सौभाग्यकवचम् वामकेश्वरतंत्रे

४५१३

4513

F. = 5

सौभाग्यकवच ७२
५

॥सौ॰क॰॥ श्रीगुरुभ्यो नमः ॥ ॐ३म् ॥ कैलासशिखरे रम्ये सुखासीनं सुरार्चितं ॥ गिरीशं गिरिजा न-
॥१॥ त्वा स्तोत्रैर्वेदार्थगोचरैः ॥१॥ प्रणम्य परया भक्त्या नम्रं हृष्टहृत्कृतांजलिः ॥ श्रीदेव्युवाच ॥ श्री
रहस्यं रक्षणकरं सर्वसंपत्करं वद ॥२॥ ईश्वर उवाच ॥ एतत्सौभाग्यकवचं रहस्यातिरहस्य-
कं ॥ सौभाग्यकवचं देवि शृणु सौभाग्यदं परं ॥३॥ शिखायां सततं पातु महात्रिपुरसुंदरी ॥ शि-
रः कामेश्वरी नित्या ललाटं भगमालिनी ॥४॥ नित्यक्लिन्ना च तद्दक्षं भेरुंडा पश्चिमं शिरः ॥ वह्निवा-
सिन्यस्य वामं वज्रेश्वर्यलकांस्तथा ॥५॥ शिवदूती ललाटं च त्वरिता तस्य दक्षिणं ॥ तद्वामपार्श्व-
मवतात्त्वेव कुलसुंदरी ॥६॥ नित्या पातु भ्रुवोर्मध्यं भ्रुवं नीलपताकिनी ॥ वामभ्रुवं च विजया
नयनं सर्वमंगला ॥७॥ ज्वालामालिन्यधिवामं विचारं कुलनासिकां ॥ दक्षश्रोत्रं तु गणपः ॥शिव॥
स्वयं पातु महोग्रमः ॥८॥ दक्षसव्यं तु बटुकः कपोलं क्षेत्रपालकः ॥ दक्षनासापुटं दुर्गा तदन्यं ॥१॥

पातु भारती ॥ ९ ॥ अणिमा दक्षिणांशं स्वं महिमा च तदन्यकं । दक्षगंडं तु गरिमा लघिमा
वोत्तरं तथा ॥ १० ॥ ऊर्ध्वमोष्ठं प्राप्तिसिद्धिः प्राकाम्यमधरोष्ठकं । ईशित्वमूर्ध्वदंतांश्च वशित्वमध
रांस्तथा ॥ ११ ॥ इच्छासिद्धिस्तु रसनां मोक्षसिद्धिस्तु तालुकं । तालुमूलद्वयं ब्राह्मी माहेश्वर्योत्तर
स्तनं ॥ १२ ॥ कुमारी चिबुकं पातु तदधः पातु वैष्णवी । कंठं रक्षतु वाराही इंद्राणी रक्षतादधः ॥ १३
ककाटिकां तु चामुंडा महालक्ष्मीस्तु सर्वतः । सर्वसंक्षोभिणी मुद्रा स्कंधं रक्षतु दक्षिणं ॥ १४
तदन्यं द्राविणी मुद्रा पायादंसद्वयं क्रमात् । आकर्षवश्यमुद्रे द्वे चोन्मादिन्यपि दक्षिणं ॥ १५ ॥ भु
जं महांकुशा वामं खेचरी दक्षकक्षकं । वामकक्षं बीजमुद्रा योनिः स्याद्दक्षबाहुकं ॥ १६ ॥ त्रिस
त्रिखंडिनी मुद्रा वामबाहुं प्रपालयेत् । कामाकर्षिणिका नित्यं रक्षतादक्षकूर्परं ॥ १७ ॥ कूर्परं वा
ममवतात् बुद्ध्याकर्षिणिका तथा । अहंकाराकर्षिणी तु प्रकोष्ठं पातु दक्षिणं ॥ १८ ॥ शब्दाकर्षि

॥सौ० क०॥
॥२॥

णिका वामं स्वर्गाकर्षिणिकावतु ॥ तन्मध्यं दक्षिणं पातु रूपाकर्षिणिके तरं ॥१९॥ रसाकर्षिणि-
का पातु मम लिंगं च दक्षिणं ॥ गंधाकर्षिणिका वामं चित्ताकर्षिणिकावतु ॥२०॥ करस्थं दक्षिणं धैर्या-
कर्षिणी पातु वामकं ॥ स्मृत्याकर्षिण्यपसौ पालिं नामाकर्षिण्यप दक्षिणं ॥२१॥ बीजाकर्षिण्यप सौ पाया-
स्मलं दक्षिणांगुलीः ॥ आत्माकर्षिण्यप दक्षिण्या अमृताकर्षिणीन् स्तान् ॥२२॥ शरीराकर्षिणी वामनखा-
न्रक्षतु सर्वदा ॥ अनंगकुसुमा शक्तिः पातु दक्षस्तनोपरि ॥२३॥ अनंगमेखला चान्या स्तनोर्ध्वम-
भिरक्षतु ॥ अनंगमदना दक्षस्तनं तच्चूचुकं पुनः ॥२४॥ रक्षतादनिशं देवी ह्यनंगमदनातुरा ॥ अनं-
गरेखा वामं च वक्षोजं तस्य चूचुकं ॥२५॥ अनंगवेगिनी क्रोडमनंगस्यांकुशावतु ॥ अनंगमालि- ॥शिव॥
नी पायाद् हृदयस्थं नमद्दिनिशं ॥२६॥ सर्वसंक्षोभिणी रक्षेत् सर्वविद्राविणी परा ॥ कुक्षिं सर्वाकर्षि- ॥२॥
णी तु पातु पार्श्वं तु दक्षिणं ॥२७॥ आह्लादिनी वामपार्श्वं मध्यं संमोहिनी परं ॥ सा सर्वस्तंभिनी पृष्ठं

2

नाभिं वै सर्वजृंभिणी ॥ २८ ॥ वशंकरी वस्तिदेशं कटिं सा सर्वरंजिनी ॥ उन्मादिनी तु सर्वाद्या
पायाज्जघनमंडलं ॥ २९ ॥ सर्वार्थसाधनी शक्तिर्नितंबं रक्षतादियं ॥ दक्षस्फिचं सदा पातु सर्व
संपत्प्रपूरिणी ॥ ३० ॥ सर्वमंत्रमयी शक्तिः पातु वामं स्फिचं मम ॥ पायात्कुकुंदरद्वंद्वं सर्वद्वंद्वक्षयं
करी ॥ ३१ ॥ सर्वसिद्धिप्रदा देवी पातु दक्षिणवंक्षणं ॥ सर्वसंपत्प्रदा देवी तदन्यं पातु वंक्षणं ॥ ३२ ॥
सर्वप्रियंकरी देवी गुह्यं रक्षतु मे सदा ॥ मेढ्रं रक्षतु मे देवी सर्वमंगलकारिणी ॥ ३३ ॥ सर्वकामप्रदा
देवी पातु मुष्कं तु दक्षिणं ॥ पायात्तदन्यं देवी तु सर्वदुःखविमोचिनी ॥ ३४ ॥ सर्वमृत्युप्रशमनी देवी
पातु गुदं मम ॥ पातु देवी देहमध्यं सर्वविघ्ननिवारिणी ॥ ३५ ॥ सर्वांगसुंदरी देवी रक्षताद्दक्षसक्थि
कं ॥ वामसक्थितलं पाया सर्वसौभाग्यदायिनी ॥ ३६ ॥ अष्ठीवन्तं मम सर्वज्ञा देवी रक्षतु दक्षिणं
॥ अन्याष्ठीवं सर्वशक्तिर्देवी पातु चिरं मम ॥ ३७ ॥ सर्वैश्वर्यप्रदा देवी दक्षजानुं सदावतु ॥ सर्वज्ञान

॥सौ० क॥ मयी देवी तदन्यज्ञानातुरस्तु ॥ ३८ ॥ अव्यादियं दक्षकुंघां सर्वव्याधिविनाशिनी ॥ तदन्यां पातु दे-
॥२०॥ वांतः सर्वाधारस्वरूपिणी ॥ ३९ ॥ सर्वपापहरा देवी दक्षगुल्फं सदावतु ॥ सर्वानंदमयी देवी वामगुल्फं
सदावतु ॥ ४० ॥ रक्षांघ्रिं वशिनी पातु पूर्वं वाग्देवता मम ॥ सर्वं कामेश्वरी पूर्वं सदा वाग्देवतोत्तरं ॥ ४१ ॥
पार्ष्णिं मे दक्षिणां पायात्सर्वरक्षास्वरूपिणी ॥ अव्यादव्यां सदा पार्ष्णिं सर्वोन्नतफलप्रदा ॥ ४२ ॥ मो-
दिनी प्रपदं पातु दक्षिणं विमलेतरं ॥ अंगुलीररुणा पातु दक्षपादनखोच्चला ॥ ४३ ॥ तदन्याजयि-
3 नी पायात्सदा वाग्देवतेतरं ॥ दक्षपादतलं सर्वेश्वरी वाग्देवता मुदा ॥ ४४ ॥ वामपादतलं पायात्कौ-
लिनी देवता मम ॥ कुर्वंतु जृंभणा बाणाः क्षोभं क्याकर्षणं मम ॥ ४५ ॥ मोहं संहरतादिक्षुकोदंडं भृंगमौ- ॥शिव॥
र्विकं ॥ करोतु सततं पाशो वशीकरणमुत्तमं ॥ ४६ ॥ विदध्यात्त्वंकुशो नित्यं स्तंभनं शत्रुसंगरे ॥ पीठं मे का- ॥३॥
मरूपाख्यं पातु कामाग्निकामतः ॥ ४७ ॥ पूर्णपूर्णगिरेः पीठं पायाद्दर्शं मदीयकं ॥ जालंधरस्य जाल-

घंटीकं रक्षतु मे सदा ॥४८॥ सायुज्यं तनुतां प्राज्यं श्रीपीठं श्रीकरं मम ॥ कामेश्वरी चात्मतत्वं रक्षे-
द्व्रजेश्वरी च मां ॥४९॥ विद्यातत्वं शैवतत्वं पायाद्धी भगमालिनी ॥ कामं क्रुद्धा म्महान्मतुमन्मतालिब
मासनं ॥५०॥ ओं घंटो धापाहं हन्यात्क्रूपोतां बुलासनं ॥ जोमं दिव्यासनं सिंहाद्या त्मा दिव्यरूप
माकं ॥५१॥ मोहं संहरतात्त्वकं मदं मंत्रासनं महत् ॥ मासयंत्राशयेन्नित्यं मम साध्यासनं जगत् ॥५२
आधारं त्रिपुरा रक्षेत्स्वाधिष्ठानं पुरेश्वरी ॥ मणिपूरं मणिद्योतं पायात्त्रिपुरसुंदरी ॥५३॥ अना-
हतं महत्वं नित्यं त्रिपुरवासिनी ॥ विशुद्धं त्रिपुराश्रीश्च आज्ञां त्रिपुरमालिनी ॥५४॥ उन्मेषं त्रिपु-
रासिद्धा त्रिपुरांबा च बिंदुकं ॥ सुषुम्णां पातु मे नित्यं महात्रिपुरसुंदरी ॥५५॥ त्रैलोक्यमोहनं चक्रं
रोमकूपांश्च पातु मे ॥ सर्वाशापूरकं चक्रं सप्तधातूंस्वरक्षतु ॥५६॥ सर्वसंक्षोभणं चक्रं प्राणाद्यं
वायुपंचकं ॥ सौभाग्यदायकं चक्रं नागाद्यनिलपंचकं ॥५७॥ सर्वार्थसाधनं चांतःकरणानि च तु

यं ॥ सर्वरक्षाकरं चक्रं पायात्तु षष्ठकं च मे ॥ १८ ॥ सर्वरोगहरं चक्रं रक्षतान्मे गुणत्रयं ॥ सर्वसिद्धिप्रदं
चक्रं मम व्याल्कोशपंचकं ॥ १९ ॥ सर्वानंदमयं चक्रं यशः कीर्तिं च रक्षतु ॥ सौंदर्यं मन्मथः पायाद्र-
तिः पातु रतिं मम ॥ २० ॥ प्रीतिर्मे पातु सा प्रीतिकलाहं च वसंतकः ॥ संकल्पं कल्पकोद्यानं मह
लक्ष्मीर्मम श्रियं ॥ २१ ॥ कांतिं कापालिनी रक्षेद्वंदिं मालिमंडपः ॥ पुत्रान् शंखनिधिः पायाद्भार्यां पद्म-
निधिस्तथा ॥ २२ ॥ मार्गं मां भैरवी रक्षेन्मातंगी मुकुटं सदा ॥ अष्टदिक्षु महेंद्राद्याः सायुधाः पांतु स-
र्वदा ॥ २३ ॥ पायादूर्ध्वदिशं ब्रह्मा विष्णुश्चक्रायुधो ह्यधः ॥ अनावृतानि स्थानानि कवचेन तु यानि मे ॥ २४
तानि रक्षतु सततं शिवादिगुरवः क्रमात् ॥ एतत्सौभाग्यकवचं स्वकरे यस्तु धारयेत् ॥ २५ ॥ त्रिसं-
ध्यं पठति श्रीमान् शृणुयाद्वा समाहितः ॥ तस्य श्रीप्रेरणा सिध्यंति सिद्धयस्त्वणिमादयः ॥ २६ ॥ गुटिका-
पादुकाद्यष्टसिद्धयः संभवंति च ॥ वश्यादिन्यष्टकर्माणि योगश्चांगसंभवं ॥ २७ ॥ ब्रह्मविष्णुगिरी-

॥ शि व ॥
॥ ४ ॥

॥सौ॰क॰ ॥५॥

ध्रोंड्रकंदर्पशतैर्विभिः समः॥ विहरत्यखिलान्लोकान्सिद्धगंधर्वसेवितः॥६५॥ तस्यस्मरण
मात्रेणमहाभूतपिशाचकाः॥ कीटवत्प्रपलायंते कूष्मांडभैरवादयः॥६६॥ तस्यांघ्रितोयपत
नात्प्रशाम्यंतिमहारुजः॥ तत्पादकमलासक्तरजोलेशाभिमर्शनात्॥७०॥ वश्यंभवतिश्रीत्रै
लोक्यंसचराचरं॥ भूपालमहिलाभूपाः किमुमायाविमोहिता॥७१॥ ॥इतिश्रीवामके
श्वरतंत्रेनित्याषोडशार्णविरुद्रोसौभाग्यकवचंसमाप्तम्॥ ॥शुभमस्तु॥ लिखितमिदं
कवचंद्विवेदीकृष्णदेवात्मजकालूदेवेन॥ संवत् १८० [illegible] आषाढकृष्ण ५ शानौ॥ ॥

॥शिव॥ ॥५॥